"शताह्वा मधुकं बिल्वं कौटजं फलमेव च।
सकाञ्जिकः सगोमूत्रो वस्तिर्दोषहरः स्मृतः॥"
इति दोषहरवस्तिः॥ *॥
"प्रियङ्गुर्मधुकं मुस्ता तथैव च रसाञ्जनम्।
सक्षीरः शस्यते वस्तिर्दोषाणां शमनः स्मृतः॥"
इति शमनवस्तिः॥*॥
"त्रिफलाक्वाथगोमूत्रक्षौद्रक्षारसमायुताः।
ऊषकादिप्रतीवापा वस्तयो लेखनाः स्मृताः॥"
ऊषकादिप्रतीवापाः ऊषकादिगणविशेषचूर्ण-प्रक्षेपाः। इति लेखनवस्तयः॥ *॥
"बृंहणद्रव्यनिःक्वाथैः कल्कैर्मधुरकैर्युताः।
सर्पिर्मांसरसोपेता वस्तयो बृंहणाः स्मृताः॥"
इति बृंहणवस्तयः॥ *॥
"बदर्य्यैरावतीशेलुशाल्मलीपुष्पजाङ्कुराः।"
ऐरावती नारङ्गी। शेलुः बहुवारः।
"क्षीरसिद्धाः क्षौद्रयुक्ता नाम्ना पिच्छिलसंज्ञिताः॥
वराहैणोरभ्रेभरुधिरैर्युक्ता देया विचक्षणैः।"
एणः कृष्णसारः। उरभ्रो मेषः। इभः हस्ती।
"मात्रा पिच्छिलवस्तीनां पलैर्द्वादशभिर्मता॥"
इति पिच्छिलावस्तयः॥*॥
"दत्त्वादौ सैन्धवस्याक्षं मधुनः प्रसृतिद्वयम्।
विनिर्मथ्य ततो दद्यात् स्नेहस्य प्रसृतित्रयम्॥
एकीभूते ततः स्नेहे कल्कस्य प्रसृतिं क्षिपेत्।
संमूर्च्छिते कषायन्तु चतुःप्रसृतिसम्मितम्॥
प्रक्षीयाच्च तदावापमन्ते द्विप्रसृतोन्मितम्।
क्षिप्त्वा विमथ्य दद्याच्च निरूहं कुशलो भिषक्॥
एवं प्रकल्पितो वस्तिर्द्वादशप्रसृतो भवेत्।
वाते चतुःपलं क्षौद्रं दद्यात् स्नेहस्य षट्पलम्॥
पित्ते चतुःपलं क्षौद्रं स्नेहं दद्यात् पलत्रयम्।
कफे तु षट्पलं क्षौद्रं क्षिपेत् स्नेहं चतुः-पलम्॥"
इति निरूहमात्रा॥
"एरण्डक्वाथतुल्यांशं मधु तैलं पलाष्टकम्।
शतपुष्पापलार्द्धेन सैन्धवार्द्धेन संयुतम्॥
मधुतैलिकसंज्ञोऽयं वस्तिर्दोषविलोडितः।
मेदोगुल्मकृमिप्लीहमलोदावर्त्तनाशनः॥
बलवर्णकरश्चैव वृष्यो दीपनबृंहणः॥"
इति मधुतैलिकवस्तिः॥
"क्षौद्राज्यक्षीरतैलानां प्रसृतं प्रसृतं भवेत्।
हपुषा सैन्धवाक्षांशो वस्तिः स्याद्यापनः परः॥"
यापनः धारकः। इति यापनवस्तिः॥*॥
"एरण्डमूलनिष्क्वाथो मधु तैलं ससैन्धवम्।
एष युक्तरथो वस्तिः सवचापिप्पलीफलः॥"
इति युक्तरथवस्तिः॥
"पञ्चमूलस्य निष्क्वाथस्तैलं मागधिका मधु।
ससैन्धवः सयष्ट्याह्वः सिद्धवस्तिरिति स्मृतः॥"
इति सिद्धवस्तिः॥
"व्यापत्सलोदकैः कुर्य्याद्विधावसमनीषताम्।
वर्ज्जयेदपरं कर्म्माचरेत् स्नेहवस्तिवत्॥"
अथोत्तरवस्तिविधिः।
"अतः परं प्रवक्ष्यामि वस्तिमुत्तरसंज्ञितम्।
निरूहादुत्तरो यस्मात्तस्मादुत्तरसंज्ञकः॥
द्वादशाङ्गुलकं नेत्रं मध्ये च कृतकर्णिकम्।
मालतीपुष्पवृन्ताभं छिद्रं सर्षपनिर्गमम्॥
पञ्चविंशतिवर्षाणामधोमात्रा द्विकार्षिका।
तदूर्द्ध्वं पलमात्रा च स्नेहस्योक्ता भिषग्वरैः॥
अथ स्थापनशुद्धस्य तृप्तस्य स्नानभोजनैः।
स्थितस्य जानुमात्रे च पीठेऽन्विष्य शलाकया॥
स्निग्धया मेढ्रमार्गन्तु ततो नेत्रं नियोजयेत्।
शनैः शनैर्घृताभ्यक्ते मेढ्ररन्ध्रेऽङ्गुलानि षट्॥
ततोऽवपीड़येद्वस्तिं शनैर्नेत्रं विनिर्हरेत्।
ततः प्रत्यागते स्नेहे स्नेहवस्तिक्रमो हितः॥
स्त्रीणां कनिष्ठिकास्थूलं नेत्रं कुर्य्याद्दशाङ्गुलम्।
मुद्गः प्रवेशं योन्यञ्च योन्यन्तश्चतुरङ्गुलम्॥
द्व्यङ्गुलं मूत्रमार्गे च सूक्ष्मनेत्रं वियोजयेत्।
मूत्रकृच्छ्रविकारेषु बालानां त्वेकमङ्गुलम्॥
शनैर्निष्कम्प्यमाधेयं सूक्ष्मं नेत्रं विचक्षणैः।"
मालतीपुष्पवृन्ताभं नेत्रमित्युक्तत्वात् पुनः सूक्ष्म-शब्दाभिधाने बालानां ततोऽपि नेत्रस्य सूक्ष्मता-बोधनार्थम्।
"योनिमार्गेषु नारीणां स्नेहमात्रा द्विपालिका॥
मूत्रमार्गे पलोन्माना बालानाञ्च द्विकार्षिकी।
उत्तानायै स्त्रियै दद्यात् ऊर्द्ध्वजान्वै विचक्षणः॥
अप्रत्यागच्छति भिषक् वस्तावुत्तरसंज्ञिते।
भूयो वस्तिं विदध्याच्च संयुक्तं शोधनैर्गणैः॥
फलवर्त्तिं विदध्याद्वा योनिमार्गे दृढ़ं भिषक्।
सूत्रैर्विनिर्म्मितां स्निग्धां शोधनद्रव्यसंयुताम्॥
दह्यमाने तथा वस्तौ दद्याद्वस्तिं विशारदः।
क्षीरिद्रुमकषायेण पयसा शीतलेन वा॥"
दह्यमाने वस्तौ यस्मिन् स्थाने वस्तिर्दत्तस्तस्मिन् दह्यमाने।
"वस्तिः शुक्ररुजः पुंसां स्त्रीणामार्त्तवजा रुजः।
हन्यादुत्तरवस्तिस्तु नोचिता मेहिनां क्वचित्॥
सम्यग्दत्तस्य लिङ्गानि व्यापदक्रम एव च।
वस्तेरुत्तरसंज्ञस्य समानः स्नेहवस्तिना॥"*॥
अथ फलवर्त्तिविधिः।
"घृताभ्यक्ते गुदे क्षिप्ता सूक्ष्मा स्याङ्गुष्ठसन्निभा।
मलप्रवर्त्तिनी वर्त्तिः फलवर्त्तिश्च सा स्मृता॥"
इति भावप्रकाशः॥ *॥
("चतुरङ्गुलां वेणुमयीं नाड़ीं प्रतिलक्ष्यां कृत्वा तया वस्तिप्रतिकर्म्म कुर्य्यात्।
नातिशीते च काले च न शीते न च भोजिते।
न निद्रालौ च मूत्रार्त्ते विष्ठार्त्ते न च खेदभाक्॥
वस्तिकर्म्म निरूहञ्च कारयेत् निरस्य च।
आदौ मूत्रविष्ठोत्सर्गं कृत्वा गुदं प्रक्षाल्य नाति शिथिलशय्यायां शाययित्वा वामाङ्गे वामपादं दक्षिणाङ्गे दक्षिणपादञ्च सङ्कोच्य जङ्घोपरि-संस्थाप्य गुदाभ्यन्तरे द्व्यङ्गुलमात्रां नाड़ीं सुधीः सञ्चारयेत्। ततः शनैः शनैर्वस्तिं निष्पीड्य द्विपलपरिमिततैलेन निरूहं कुर्य्यात्। निरूहा-नन्तरं शनैः शनैरुत्तानं शाययित्वा ऊर्द्ध्वौ कृत्वा च पश्चात् सङ्कोच्य पाणिभिः पञ्च वारान् स्फिक्पिण्डान् मोटयेत्। ततः स्वस्थं कृत्वा क्षीणनाड्यामाशयं मलस्थानं शोधयति। वस्त्यु-दरवातान् दोषान् निवारयति। पण्डितास्तं वस्तिनिरूहं तद्वस्तिकर्म्म च विदुः।" इति हारीते सूत्रस्थाने तृतीयेऽध्याये॥

"कृतक्षणं शैलवरस्य रम्ये
स्थितं धनेशायतनस्य पार्श्वे।
महर्षिसंघैर्वृतमग्निवेशः
पुनर्व्वसुम्प्राञ्जलिरन्वपृच्छत्॥
वस्तिर्नरेभ्यः किमपेक्ष्य दत्तः
स्यात् सिद्धिमान् किम्मयनस्य नेत्रम्।
कीदृक् प्रमाणाकृति किङ्गणश्च
केषाञ्च किं योनिगुणश्च वस्तिः॥
निरूहकर्म्म प्रणिधानमात्राः
स्नेहस्य वा काः शमने विधिः कः।
के वस्तयः केषु मता इतीदं
श्रुत्वोत्तरं प्राह वचो महर्षिः॥
समीक्ष्य दोषौषधदेशकाल-
सात्म्याग्निसत्त्वौकवयोबलानि।
वस्तिः प्रयुक्तो नियतं गुणाय
स्युः सर्व्वकर्म्माणि च सिद्धिमन्ति॥
सुवर्णरूप्यत्रपुताम्ररीति-
कांस्यास्थिशस्त्रद्रुमवेणुदन्तैः।
नलैर्व्विषाणैर्मणिभिश्च तैस्तैः
कार्य्याणि नेत्राणि सुकर्णिकानि॥
षड्द्वादशाष्टाङ्गुलसम्मितानि
षड्विंशतिद्वादशवर्षजानाम्।
स्युर्मुद्गककर्कन्धुसतीनवाहि-
छिद्राणि वर्त्त्या पिहितानि चापि॥
यथावयोऽङ्गुष्ठकनिष्ठिकाभ्यां
मूलाग्रयोः स्युः परिणाहवन्ति।
ऋजूनि गोपुच्छसमाकृतीनि
श्लक्ष्णानि च स्युर्गुलिकामुखानि॥
स्यात् कर्णिकैकाग्रचतुर्थभागे
मूलाश्रिते वस्तिनिबन्धने द्वे।
जरद्गवो माहिषहारिणो वा
स्यात् शौकरो वस्तिरजस्य वापि॥
दृढ़स्तनुर्नष्टशिरो विगन्धः
कषायरक्तः सुमृदुः सुशुद्धः।
कृत्वा वयो वीक्ष्य यथानुरूपं
नेत्रेषु योज्यस्तु सुबद्धसूत्रः॥
वस्तेरभावे प्लवानां गलो वा
स्यादङ्कपादः सुघनः पटो वा।
आस्थापनार्हं पुरुषं विधिज्ञः
समीक्ष्य पुण्येऽहनि शुक्लपक्षे॥
प्रशस्तनक्षत्रमुहूर्त्तयोगे
जीर्णान्नमेकाग्रमुपक्रमेत।
बालां गुडूचीं त्रिफलां सरास्नां
द्वे पञ्च मूले च पलोन्मितानि॥
अष्टौ फलान्यर्द्धतुलाञ्च मांसा-
च्छागात् पचेदप्सु चतुर्थशेषम्।
पूतं यवानीफलबिल्वकुष्ठ-
वचाशताह्वा घनपिप्पलीनाम्॥